ॐ

रुद्रमन्त्रसहित-चमकानुवाकाः

पं० विश्वनाथ एन्ड सन्स फोटूग्राफर

इत्येतैः

स्वकीय "कश्मीर प्रताप स्टीम् प्रेस" नाम्नि

यन्त्रालये

पं० गोविन्दभट्ट हुंडू द्वारा संशोधयित्वा प्रकाशिताः ॥

द्वितीयं संस्करणम्

शाकाब्दाः १८५०　　　　वैक्रमाब्दाः १९८५

मूल्यं ६ आना

[illegible]

[illegible]

[illegible]

ओ३म्

अथ

॥ रुद्रमन्त्रसहित-चमकानुवाकाः ॥

डों नमो भगवते महारुद्राय ॥

डों देवं सुधाकलशसोमकरं त्रिनेत्रं पद्मासनं च वरदाभयदं सुशुभ्रम् । शङ्खाभयाब्जवरभूषितया च देव्या वामेङ्कितं शमनभङ्गहरं नमामि ॥

शुम्भुं शूलपिनाकसोमकलशभ्राजिष्णुहस्ताम्बुजं देव्यालंकृतवामपार्श्वमुरगाधीशस्फुरत्कङ्कणम् । गङ्गागर्जितगर्भजूटममलं चन्द्रार्धमौलिं प्रभुं कीनाशक्लेशनाशनिश्चितधियं भस्माङ्गरागं भजे ॥

यस्मात्सर्वमिदं प्रपञ्चरचितमादौ जगज्जायते
यस्मिंस्तिष्ठति लीयते च समये जायेत कल्पे पुनः ।
यं ध्यात्वा मुनयो प्रपञ्चरहितं विन्दन्ति मोक्षं ध्रुवं
तं वन्दे पुरुषोत्तमाख्यमखिलं नित्यं विभुं निष्कलम् ॥

शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकम् । गङ्गाध-
रं दशभुजं सर्वाभरणभूषितम् ॥ नीलग्रीवं शशा-
ङ्काङ्कं नागयज्ञोपवीतिनम् । व्याघ्रचर्मोत्तरीयं च व-
रेण्यमभयप्रदम् ॥ कमण्डल्वक्षसूत्राभ्यामन्वितं शू-
लपाणिकम्[1] । ज्वलन्तं पिङ्गलजटाशिख[2]मुद्द्योत-
कारिणम् ॥ अमृतेनाप्लुतं हृष्टमुमादेहार्धधारिणम् ।
दिव्यसिंहासनासीनं दिव्यभोगसमन्वितम् ॥ दि-
ग्देवतासमायुक्तं सुरासुरनमस्कृतम् । नित्यं च शा-
श्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥ सर्वव्यापिनमीशानं
रुद्रं वै विश्वरूपिणम् । एवं ध्यात्वा द्विजः सम्यक्
ततो यजनमारभेत् ॥ मृत्युञ्जय महादेव पाहि मां
शरणागतम् । जन्ममृत्युजरारोगैः पीडितं भवबन्ध-
नैः ॥ इति विज्ञाप्य देवेशं जपेन्मन्त्रं च त्र्यम्बक-
म् ॥ त्र्यम्बकं यजामहे सुगन्धिं पु[3]ष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

---

१ नम् २ खा ३ रयिपोषणम् (शत्रुनाशनम्)

आ त्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैरिह[1] केतुमद्भिर्वाताजवेन बलमद्भिर्मनोजवायातु शीघ्रं मम रुद्राय हव्यन्देवानां च ऋषीणां चासुराणां च पूर्वजं सहस्राक्षं विरूपाक्षं विश्वरूपं महादेवं शिवमावाहयाम्यहम् । आवाहयाम्यहं देवमीश्वरं पार्वतीपतिम् ॥ वृषभासनमारूढं नागाभरणभूषितम् । प्रीयतां यजमानस्य तुष्टो भूयाज्जगत्पतिः । शुक्लवर्णो महातेजाः शुक्लस्रग्दामभूषितः । बलिः पुष्पं चरुश्चैव धूपोऽयं प्रतिगृह्यताम् ॥

(पाठकाले) ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ३ ॥

(होमकाले) षडाहुतयः

ॐ तत्पुरुषाय विद्महे १ ॥

ॐ महादेवाय धीमहि २ ॥

ॐ तन्नो रुद्रः प्रचोदयात् ३ ॥

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ४ ॥

ॐ तन्नो रुद्रः प्रचोदयात् ५ ॥

---

१ श्वेतैरश्वैःसह

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ६ ॥

शतरुद्रियन्देवानां रुद्रशमनं भवाय शर्वायश्च प्रत्युत्क्रान्तानुवाको देवर्षी रुद्रदैवत्यः त्रिष्टुप्छन्दश्चयने विनियोगः ॥ नमस्ते देवा रौद्रमानुष्टुभमाद्या गायत्री पञ्चमषष्ट्यौ पङ्क्त्यन्त्या महापङ्क्तिर्मा भैरेकपदा जगत्यनुष्टुप्त्रिष्टुब्महावृहती यवमध्या रुद्रो देवता चरमेष्टिका अस्य रुद्रस्य प्रश्नस्य अनुष्टुप्छन्दः अघोरऋषिः सङ्कर्षणमूर्तिः सुरूपो योऽसावादित्यः परः पुरुषः स[1] एव देवता अग्निक्रतुचरमायामिष्टिकायां शतरु[2]द्रपाठे (होमे) विनियोगः ॥

सकलस्य रुद्राध्यायस्य श्रीमहारुद्रो देवता एका गायत्री छन्दः तिस्रोऽनुष्टुभः तिस्रः पङ्क्तयः सप्ता-

---

१ एष रुद्रो २ रुद्रिय

नुष्टुभो द्वे जगत्यौ परमेष्ठीऋषिः समस्तपापक्षयार्थे सकलकामनासिद्ध्यर्थे श्रीमहारुद्रदेवतासन्तोषणार्थे चमकानुवाकसहितरुद्रमन्त्रपाठे (होमे) विनियोगः ॥

ध्यानम् कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् । सदा रमन्तं हृदयारबिन्दे भवं भवानीसहितं नमामि ॥

ध्याये नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् । पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

आपातालनभस्तलान्तभुवनब्रह्माण्डमाविःस्फुरज् ज्योतिः स्फाटिकलिंगमौलिविलसत्पूर्णेन्दुबिम्बामृतैः । अस्तोकाप्लुतमेकमेकमनिशं रुद्रानुवाकं जपन् ध्यायन्नीप्सितसिद्धये द्रुतपदं विप्रोऽभिषिञ्चेच्छिवम् ॥

आशुः शिशान इति शुक्रज्योतिष्मानंशुप्रजननं सर्वाः प्रजाः काश्यप्या इति कश्यपस्य वाजस्य प्रसवोऽग्नेः ॥

आशुः शिशानो वृषभो न युध्मो[1] घनाघनः क्षोभणश्चर्षणीनाम् । संक्रन्दनोऽनिमिष एकवीरः शतँ सेना अजयत्साकमिन्द्रः ॥ संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥ स इषुहस्तैः स निषङ्गिभिर्वशी सँस्रष्टा स युध इन्द्रो गणेन । सँसृष्टजित्सोमपा बाहुशर्ध्यू[2]र्ध्वधन्वा प्रति हिताभिरस्ता ॥ बृहस्पते परि[3]दीया रथेन रक्षोहामित्राँ २ अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥ बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः । अभि वीरो अभि ष[4]त्वा स[5]होजा जैत्रमिन्द्ररथमा तिष्ठ गोवित् ॥ गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म[6] प्रमृणन्तमोजसा । इमँ सजाता अनु वीरयध्वमिन्द्रं सखायोऽनु सँ रभध्वम् ॥ अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडयुध्योऽस्माकँ सेना अवतु प्र युत्सु ॥ इन्द्र आ[8]सां नेता बृहस्पतिर्द[9]क्षिणा यज्ञः पुर एतु सोमः ।

---

१ भीमो २ शर्ध्युग्र ३ धी ४ स ५ सहोजिज्जैत्रायनो रथ ६ ज्मा ७ मिन्द्रसखायमनु संव्ययध्वम् ८ एषां ९ तिर्दक्षिणा

देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो य[1]न्त्वग्रम् ॥
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताँ शर्द्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु । अस्माकं वीरा उत्तरे भवन्त्व[2]स्माँ २॥ उ देवा अवता हवेषु ॥

शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च । [3]सत्यश्चर्तपाश्चात्यँहाः ॥ ईदृङ्चान्यादृङ्च सदृङ्च प्रतिसदृङ् । मितश्च सम्मितश्च सभराः ॥ ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्त्ता च विधर्त्ता च विधारय ॥ ऋतजिच्च सत्यजिच्च से[4]नंजिच्च सुषेणश्च अन्तिमित्रश्च दूरे अमित्रश्च गणः ॥ ईदृक्षास एतादृक्षास ऊ[5] षु णः सदृक्षासः प्रतिसदृक्षास एतन । मितासश्च सम्मितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन् ॥ इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानो यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् । एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानु वर्त्मानो भवन्तु ॥

॥ ॐ नमः शिवाय वरदाय ॥

---

१ यन्तु मध्ये २ स्मानु दे ३ सत्यश्च तपश्च हंहा [सत्यश्च ऋतपाश्चा०] ४ ना ५ ऊ ष णः

ओं नमस्ते रुद्र मन्यवे बाहुभ्यामुत ते नमः ।
उतो त इषवे नमः ॥ या ते रुद्र शिवा तनूरघो-
रापापकाशिनी । तया नस्तन्वा शन्तमया गिरिश-
न्ताभि चाकशीहि ॥ यामिषुं गिरिशन्त हस्ते
विभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिंसीः
पुरुषं जगत् ॥ शिवेन वचसा त्वा गिरिशाच्छा
वदामसि । यथा नः सर्वमिज्जगदयक्ष्मँ सुमना असत्
॥ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वाञ्जम्भयं[२] सर्वाश्च यातुधान्योऽधराचीः
परासुव ॥ असौ यस्ताम्रो अरुण उत बभ्रुः सुम-
ङ्गलः । ये चेमे रुद्रा अभितो दिक्षु श्रिताः । सह-
स्रशोऽवैषां हेळ ईमहे ॥ असौ योऽवसर्पति नील-
ग्रीवो विलोहितः । उतैनं गोपा अदृशन्नुतैनमुद-
हार्यः ॥ उतैनं विश्वा भूतानि स दृष्टो मृळयाति[३] नः ॥
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो

---

१ तुवा २ यन् ३ यति

ये[1] अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥ प्र मुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप विज्यं धनुः कपर्दिनो विशल्यो बाणवानुत ॥ अनेशन्नस्येषव आभुरस्य निषङ्गथिः[2] ॥ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयाऽस्मान्विश्वतस्त्वमयक्ष्मेण[3] परिब्भुज ॥ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवाऽरे अस्मन्निधेहि तम् ॥ नमांसित आयुधायाऽनातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ अवतत्य धनुष्ट्वँ[4] सहस्राक्ष शतेषुधे । निशीर्य शल्यानाँ मुखं शिवो नः सुमना भव ॥ यात इषुः शिवतमा शिवं बभूव ते धनुः । शिवा शरव्या या तव तया नो मृळ जीवसे ॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् । मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ मा नस्तोके तनये मा न आयौ

१ य २ धिः ३ यक्ष्मया ४ स्त्वँ

मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ विश्वेश्वर महादेव शिव साशिव सदाशिव त्रिकाल त्रिकालकाल कालाग्निशिख नीलकण्ठ महामृत्युञ्जयभट्टारक नमो नमः ॥

ॐ अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः । द्युम्नै-र्वाजेभिरागतम् ॥

वाजश्चमे प्रसवश्चमे प्रयतिश्चमे प्रसितिश्चमे धीतिश्चमे क्रतुश्चमे स्वरश्चमे श्लोकश्चमे श्रवश्चमे[2] श्रुतिश्चमे ज्योति-श्चमे स्वश्चमे[3] ❀ प्राणश्चमेऽपानश्चमे व्यानश्चमेऽसुश्चमे चित्तंचम आधीतंचमे वाक्चमे मनश्चमे चक्षुश्चमे श्रोत्र-श्चमे दक्षश्चमे बलंचम ❀ ओजश्चमे सहश्चमे आत्माचमे तनूश्चमे शर्मचमे वर्मचमेऽङ्गानिचमेऽस्थीनिचमे परूँषि-चमे शरीराणिचम आयुश्चमे जराचमे ॥ १ ॥ यज्ञेन क०

ॐ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो । नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो । नमः शिष्पिञ्जराय त्विषीमते पथीनां पतये नमो । नमो बभ्लुशाय व्याधिनेऽन्नानां पतये नमो ।

---

१ सृ २ श्रा ३ सुवश्च ४ स्था ५ श्र ❀ संहितायां तारकांक चिह्नितस्थानेष्वितः सर्वत्र "यज्ञेन कल्पताम्" इत्यस्ति ॥

नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो । नमो भवस्य हेत्यै जगतं[१]स्पतये नमो । नमो रुद्रायाततायिने क्षेत्राणां पतये नमो । नमः सूतायाहन्त्[२]या-य वनानां पतये नमो । नमो रोहिताय स्थपतये वृक्षाणां पतये नमो । नमो मन्त्रिणे वाणिजाय कक्षा[३]णां पतये नमो । नमो भुवन्तये वारिवस्कृता-यौषधीनां पतये नमो । नम आक्रन्दायत उच्चैर्घो-षाय सत्वानां पतये नमो । नमः कृत्[४]संवीताय धाव-ते पत्तीनां पतये नमो ।

ज्यैष्ठ्यश्चम आधिपत्यश्चमे मन्युश्चमे भामश्चमेऽमश्च-मेऽम्भश्चमे जेमाचमे महिमाचमे वरिमाचमे प्रथिमाचमे व[५]र्ष्माचमे द्राघ्[६]वाचमे वृद्धश्चमे वृद्धिश्चमे सत्यश्चमे श्रद्धा-चमे जगच्चमे धनश्चमे वशश्चमे त्वषिश्चमे क्रीडाचमे मोदश्चमे जातंचमे जनिष्यमाँ[७]णंचमे सूक्तश्चमे सुकृत-श्चमे ❀ वित्तश्चमे वे[८]द्यंचमे भूतंचमे भविष्यच्चमे सुगश्चमे सुपथ्[९]यंश्चमे ऋद्धश्चम ऋद्धिश्चमे क्लृप्तञ्चमे क्लृप्तिश्चमे मतिश्चमे सुमतिश्चमे ॥ १ ॥

---

१ तां २ न्त्वा ३ क्षया ४ त्स्नं ५ वर्षिमा ६ द्राघिमा (द्राघुया) ७ मानं ८ विद्यं 'विद्या' ९ थं

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो । नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो । नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो । नमो निचराय परिचरायारण्यानां पतये नमो । नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो । नमः सृकायिभ्यो जिघाँसद्भ्यो मुष्णतां पतये नमो । नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यः प्रकृन्तानां पतये नमो । नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमः । नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो । नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमो । नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो । नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमो । नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो । नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो । नमः शयानेभ्य आसीनेभ्यश्च वो नमो । नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो । नमः

सभाभ्यः सभापतिभ्यश्च वो नमो । नमोऽश्वेभ्योऽश्व-
पतिभ्यश्च वो नमः ।

शश्चमे मयश्चमे प्रियश्चमेऽनुकामश्चमे कामश्चमे सौम-
नसश्चमे भगश्चमे द्रविणश्चमे भद्रञ्चमे श्रेयश्चमे व[1]स्यश्चमे
यशश्चमे ❀ यन्ताचमे धर्ताचमे क्षेमश्चमे धृतिश्चमे विश्वं-
चमे महश्चमे संविच्चमे ज्ञात्र[2]ञ्चमे सूश्चमे प्रसूश्चमे सीरंचमे
[3]लयश्चमे ऋतञ्चमेऽमृतंचमेऽयक्ष्मंचमेऽनामयच्चमे जीवा-
तुश्चमे दीर्घायुत्वश्चमेऽनमित्रञ्चमेऽभयंचमे [4]सुगञ्चमे शय-
नंचमे सूषा[5]चमे सुदिनंचमे ॥ ३ ॥ यज्ञेन कल्पताम्

नम आव्याधिनीभ्यो विविध्यद्भ्यश्च वो नमो ।
नम उगणाभ्यः तृँहतीभ्यश्च वो नमो । नमो व्रात-
भ्यो व्रातपतिभ्यश्च वो नमो । नमो गणेभ्यो गणप-
तिभ्यश्च वो नमो । नमः कृच्छ्रेभ्यः कृच्छ्रपतिभ्यश्च
वो नमो । नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो ।
नमः सेनाभ्यः सेना[6]नीभ्यश्च वो नमो । नमो रथि-
भ्यो वँरूथिभ्यश्च वो नमो । नमो महद्भ्योऽर्भके-

१ श्य २ त ३ ला ४ ख ५ श्च ६ नि ७ अरथेभ्यश्च

भ्यश्च वो नमो । नमो युवभ्य आशिनेभ्यश्च वो नमो । नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो । नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो । नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो । नमः पुञ्जिष्ठेभ्यो निषादेभ्यश्च वो नमो । नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो । नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ।

ऊर्क्चमे सूनृताचमे पयश्चमे रसश्चमे घृतञ्चमे मधुश्चमे सग्धिश्चमे सपीतिश्चमे कृषिश्चमे वृष्टिश्चमे जैत्रञ्चम औद्भिद्यंचमे ❀ रयिश्चमे रायश्चमे पुष्टञ्चमे पुष्टिश्चमे विभुचमे प्रभुचमे पूर्णञ्चमे पूर्णतरंचमे कुयवाश्चमेऽक्षितञ्चमेऽन्नञ्चमेऽक्षुच्चमे ❀ व्रीहयश्चमे यवाश्चमे माषाश्चमे तिलाश्चमे नीवाराश्चमे श्यामाकाश्चमेऽणवश्चमे प्रियङ्गवश्चमे गोधूमाश्चमे मसूराश्चमे मुद्गाश्चमे खल्वाश्चमे ॥ ४ ॥ यज्ञेन कल्पताम्

नमो भवाय च रुद्राय च । नमः शर्वाय च पशुपतये च । नमो नीलग्रीवाय च शितिकण्ठाय च ।

१ सि २ गा ३ दं ४ श्च ५ तिश्च ६ म

नमो व्युप्तकेशाय च कपर्दिने च । नमः सहस्राक्षा-
य च शतधन्वने च । नमो गिरिशाय च शिपिवि-
ष्टाय च । नमो मीढुष्टमाय चेषुमते च । नमो ह्रस्वाय
च वामनाय च । नमो बृहते च वर्षीयसे च । नमो
वृद्धाय च सवृध्वने च । नमोऽग्र्याय च प्रथमाय
च । नम आशवे चाजिराय च । नमः शीभ्याय
च शीघ्र्याय[2] च । नम ऊर्म्याय चावस्वन्याय च ।
नमो नाद्याय च द्वीप्याय च ॥

अश्माचमे मृत्तिकाचमे गिरयश्चमे पर्वताश्चमे सिक-
ताश्चमे वनस्पतयश्चमे हिरण्यञ्चमेऽयश्चमे सीसंचमे
त्रपुचमे[3] श्यामंचमे लोहितायसंचमे * अग्निश्चम आप-
श्चमे वीरुधश्चम ओषधयश्चमे कृष्टपच्यांश्चमेऽकृष्टप-
च्यांश्चमे[4] ग्राम्याश्चमे पशव आरण्याश्चमे वित्तंचमे
वित्तिश्चमे भूतंचमे भूतिश्चमे * वसुचमे वसुतिश्चमे
कर्मचमे शक्तिश्चमेऽर्थश्चम एमश्चम[5] इत्याचमे[6] गति-
श्चमे ॥ ५ ॥ यज्ञेन कल्पताम्

---

१ भा २ घ्रा ३ श्च ४ च्यं ५ इ ६ इतिश्च

नमो ज्येष्ठाय च कनिष्ठाय च । नमः पूर्वजाय चापरजाय च । नमो मध्यमाय चाप्रगल्भाय च । नमो बुध्न्याय च जघन्याय च । नमः सोभ्याय च प्रतिसर्याय च । नम आशुषेणाय चाशुरथाय च । नमो बिल्मिने च कवचिने च । नमो वर्मिणे च वरूथिनेच । नमः शूराय चावभेदिने च । नमः श्रुताय च श्रुतसेनाय च । नमो याम्याय च क्षेम्याय च । नम उर्वर्याय च खल्याय च । नमः श्लोक्याय चावसान्याय च । नमः श्रवाय च प्रतिश्रवाय च । नमो वन्याय च कक्ष्याय च ॥

अग्निश्चम इन्द्रश्चमे सोमश्चम इन्द्रश्चमे सविताचम इन्द्रश्चमे सरस्वतीचम इन्द्रश्चमे पूषाचम इन्द्रश्चमे बृहस्पतिश्चम इन्द्रश्चमे ❀ मित्रश्चम इन्द्रश्चमे वरुण-श्चम इन्द्रश्चमे धाताचम इन्द्रश्चमे त्वष्टाचम इन्द्रश्चमे विष्णुश्चम इन्द्रश्चमेऽश्विनौचम इन्द्रश्चमे मरुतश्चम इन्द्रश्चमे विश्वेचमे देवा इन्द्रश्चमे ❀ पृथिवीचम इन्द्र-

१ चापगल्भाय [चाप्रगर्भाय]

श्चमेऽन्तरिक्षं चम इन्द्रश्चमे द्यौश्चम इन्द्रश्चमे समाश्चम इन्द्रश्चमे नक्षत्राणिचम इन्द्रश्चमे दिशश्चम इन्द्रश्चमे ॥ ६ ॥ यज्ञेन कल्पताम्

नमो दुन्दुभ्याय चाहनन्याय च । नमो धृष्णवे च प्रमृशाय च । नमो निषिङ्गिणे चेषुधिमते च । नमः तीक्ष्णेषवे चायुधिने च । नमः स्वायुधाय च सुधन्वने च । नमः स्रुत्याय च पथ्याय च । नमः काट्याय च नीप्याय च । नमो नाद्याय च वैशन्ताय च । नमः कुल्याय च सरस्याय च । नमः कूप्याय चावट्याय च । नमो वर्ष्याय चावर्ष्याय च । नमो मेघ्याय च विद्युत्याय च । नमो वीध्र्याय चातप्याय च । नमो वात्याय च रेष्म्याय च । नमो वास्तव्याय च वास्तुपाय च ।

अँशुश्चमे रश्मिश्चमेऽदाभ्यश्चमेऽधिपतिश्चम उपाँशुश्चमेऽन्तर्यामश्चम ऐन्द्रवायवश्चमे मैत्रावरुणश्चम आश्विनश्चमे प्रतिप्रस्थानश्चमे शुक्रश्चमे मन्थीचमे *आग्र-

१ आग्रायण [आग्रायण]

यणाश्चमे क्षुल्लकवैश्वदेवश्चमे ध्रुवश्चमे वैश्वानरश्चम ऋतुग्रहाश्चमेऽतिग्राह्याश्चमे ऐन्द्राग्नश्चमे वैश्वदेवश्चमे मरु[1]त्वतीयश्चमे माहेन्द्रश्चमे[2] आदित्यश्चमे सावित्रश्चमे सारस्वतश्चमे पौष्णश्चमे पात्नीवतश्चमे[3] हारियोजनश्चमे[4] * स्रुचश्चमे[5] चमसाश्मे[6] ॥ ७ ॥ यज्ञेन कल्पताम्

नमः सोमाय च रुद्राय च । नमः ताम्राय चारुणाय च । नमः शङ्गवे च पशुपतये च । नम उग्राय च भीमाय च । नमो हन्त्रे च हनीयसे च । नमोऽग्रेवधाय च दूरेवधाय च । नमो वृक्षेभ्यो हरिकेशेभ्यः ॥ नमस्ताराय । नमः शंम्भवे च । मयोभवे च । नमः शङ्कराय च । मयस्कराय च । नमः शिवाय च शिवतराय च । नमः किंशिलाय च क्षयणाय च ।

वायव्यानिचमे द्रोणकलशश्चमे पूतभृच्चमेऽपूतंभृच्चमे ग्रावाणश्चमेऽधिषवणेचमेऽवभृथश्चमे स्वगाकारश्चमे ८ ॥ यज्ञेन कल्पताम्

नम इरिण्याय च प्रपथ्याय च । नमः पुलस्ति-

---

१ मारुत्वतीयाः २ महेन्द्रीयश्चमे ३ पत्नी ४ हरि ५ स्रुश्चमे ६ स ७ स ८ ल्या ९ भू १० ऽभू

ने च कपर्दिने च। नमो गोष्ठ्याय च गृह्याय च।
नमः तल्प्याय च गेह्याय च। नमः पार्याय चावा-
र्याय च। नमः प्रतरणाय चोत्तरणाय च। नमस्ती-
र्थ्याय च कुंल्याय[1] च। नमः फेन्याय च शष्प्याय
च। नमः सिकत्याय च प्रवाह्याय च। नमो ह्रद-
व्याय च निवेष्प्याय च। नमः काट्याय च गह्वरे-
ष्ट्याय[2] च। नमः शुष्क्याय च हरित्याय च। नमो
लोप्याय चोलप्याय च। नमः पाँसव्याय च रज-
स्याय च। नमः सूर्म्याय चोर्म्याय[3] च। नमः पर्ण्याय
च पर्णशादाय च। नम आखिदते च प्रखिदते च।
नमोऽभिघ्नते चापगुरमाणाय च। नम आखिदाय
च विखिदाय च। नमो वः किरिकेभ्यो देवानाँ हृद-
येभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणकेभ्यो[4] नम
आनिर्हतेभ्यः।

अग्निश्चमे घर्मश्चमेऽर्कश्चमे सूर्यश्चमे प्राणश्च-

१ कू २ ष्ठा ३ च ऊर्म्याय ४ विणत्के

मेऽश्वमेधश्चमे पृथिवीचमे दितिश्चमेऽदितिश्चमे द्यौ-श्चमे शक्करीरङ्गुलयो दिशश्चमे यज्ञेन कल्पतां ब्रतश्च-र्तुश्च संवत्सरश्च दीक्षाच तपश्चाहोरात्रे ऊर्वष्ठीवे बृहद्र-थन्तरेचमे ॥ ६ ॥ यज्ञेन कल्पताम्

द्रापे अन्धसस्पते दरिद्र नीललोहित । आसा प्रजानामेषां पुरुषाणामेषां पशूनाम् । मा भैर्मा रो[1]ङ्मा नः किञ्चनाममत् ॥ इमा रुद्राय तवसे कप-र्दिने क्षयद्वीराय प्र भरामहे मतीः । यथाः नः शम-सद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातु-रम् ॥ या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी । शिवा रुतस्य भेषजी तया नो मृळ जीवसे ॥ परि नो[2] रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतेरघायोः[3] । अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनया-य मृळ ॥ मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्ष आयुधं निधाय कृत्तिं वसान उच्चर

---

१ रु २ णो ३ तिर

पिनाकं बिभ्रदुच्चर ॥ विकिरिळ विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रँ हेतयोऽन्यमस्मन्नि वपन्तु ताः ॥ नभ्भौचमे वत्साश्चमे

त्र्यविश्चमे त्र्यवीचमे दित्यवाट्चमे दित्यौहीचमे पञ्चाविश्चमे पञ्चावीचमे त्रिवत्सश्चमे त्रिवत्साचमे तुर्यवाट्चमे तुर्यौहीचमे ❀ पष्ठवाट्चमे पष्ठौहीचमे उक्षाचमे वशाचमेऽनुड्वाँश्चमे धेनुश्चमे ❀ ऋषभश्चमे वेहश्चमे ॥ १० ॥ यज्ञेन०

सहस्रधा सहस्राणि हेतयस्तव बाह्वोः । तासामीशानो भगवः पराचीना मुखा कुरु ॥

असङ्ख्याताः सहस्राणि ये रुद्रा अधि भूम्याम् । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥ येऽस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि । तेषां स० ॥ ये नीलग्रीवाः शतिकण्ठा दिवँ रुद्रा उपाश्रिताः । तेषां स० ॥ ये नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः । तेषां स० ॥ ये वनेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः । तेषां स० ॥ येऽन्नेषु विविध्यन्ति

१ ञ्च २ वृष

पात्रेषु पिबतो जनान् । तेषां स० ॥ ये भूतानामधि-
पतयो विशिखासः कपर्दिनः । तेषां स० ॥ ये पथीनां
पथिरक्षय ऐळंमृदा यव्युधः[1][2] । तेषां स० ॥ ये तीर्था-
नि प्रचरन्ति सृकावन्तो निषङ्गिणः । तेषां स० ॥ य
एतावन्तो वा भूयाँसो वा दिशो रुद्रा वितस्थिरे[3] । तेषां
स० ॥ नमो अस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदी-
चीर्दशोर्ध्वाः । तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो
मृळयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे
दधामि ॥ नमो अस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात
इषवः तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीची-
र्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो अस्तु ते नोऽवन्तु
ते नो मृळयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां
जम्भे दधामि ॥ नमो अस्तु रुद्रेभ्यो ये पृथिव्यां येषा-
मन्नमिषवः तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रती-

---

१ ऐलबृदा (ऐलभृतः) २ युयुधः ३ तस्थि

चीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो अस्तु ते नोऽव-
न्तु ते नो मृळयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमे-
षां जम्भे दधामि ॥

एकाचमे तिस्रश्चमे तिस्रश्चमे त्रियस्त्रिंशच्चमे चतस्र-
श्चमेऽष्टौचमेऽष्टौचमेऽष्टाचत्वारिंशच्चमे ॥

वाजश्च प्रसवश्चापिजश्च क्रतुश्च वाक्पतिश्च वसुश्च
स्वर्मौर्ध्नो मूर्धा वै यशनो व्यश्नाँ आन्त्योन्त्यो भौवनो भुव-
नस्य पतिः प्रजापतिरधिपतिरियन्ते राण्मित्रो यन्तासि
यमन ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्यायायुर्यज्ञेन
कल्पतां, मनो यज्ञेन कल्प०, प्राणो यज्ञेन कल्प०, चक्षुर्यज्ञे-
न क०, श्रोत्रं यज्ञेन क०, वाग्यज्ञेन क०, आत्मा यज्ञेन क०,
ब्रह्मा यज्ञेन क०, पृष्ठं यज्ञेन क०, यज्ञो यज्ञेन कल्पतां, ऋक्च
साम च स्तोमश्च यजुश्च बृहच्च रथन्तरञ्च स्वर्देवा अग-
न्म प्रजापतेः प्रजा अभूवन्नमृता अभूम वेट्स्वाहा ॥ ११ ॥

वाजस्य नु प्रसव इति षट् ॥

विश्वे अद्य मरुतो विश्व ऊती वि[1]श्वे भवन्त्वग्नयः समि-
द्धाः । विश्वे नो[2] देवा अवसागमन्तु[3] विश्वमस्तु द्रविणं

1 र्विं 2 न्निह 3 मा

वाजो[1] अस्मे ॥ आ मा वाजस्य प्रसवो जगम्यादा मा द्यावापृथिवी विश्वरूपे । आ मा गन्तां पितरा मातरा चा मा सोमो अमृतत्वेन गम्यात् ॥ वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे । यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म्म साविषत् ॥ वाजो नः[2] सप्त प्रदिशश्चतस्रो वा परावतः । वाजो नो विश्वैर्देवैर्धनसाताविहावतु ॥ वाजो मे अद्य प्रसुवाति दानं वाजो देवान्हविषा वर्धयाति । वाजस्य हि प्रसवेनन्नमेति विश्वा आशा वाजपतिर्जयेयम ॥ वाजः पुरस्तादुत मध्यतो नो वाजो देवानृतुभिः कल्पयाति । वाजस्य हि प्रसवेनन्नमेति सर्वा आशा वाजपतिर्भवेयम ॥ सं मा सृजामि पयसा पृथिव्याः[3] सं मा सृजाम्यद्भिरोषधीभिः । सोऽहं वाजँ सनेयमग्ने[4][5] ॥ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः[6] पयस्वतीः प्रदिशः सन्तु मह्यम ॥

तेजोऽसि यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु । यो रुद्रो विश्वा भुवना विवेश तस्मै

१ वाजो अस्मिन् २ मा ३ घृतेन ४ अर्वः ५ सेनयमग्ने, म्यग्ने: ६ धाम्

Please noted the no

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]